**उरुष्या** स्त्री उरुष्यं रक्षणमिच्छति क्यच् अ यलोपः रक्षणेच्छायाम् । "उरुष्या पायुरभवत् सखिभ्यः" ऋ० ६,४४,७ ।"उरुष्या रक्षणेच्छया" भा० तृतीयाया लुक् । ततः उ ।"उरुष्यु रक्षणेच्छावति "इमे मा पीता यशस उरुष्यवोरथम्" ऋ० ८,४८,५ । "उरुष्यवः रक्षाकामाः" भा० ।

**उरूची** स्त्री उरु अञ्चति क्विप् ङीप् अल्लोपे पूर्व्वाणो दीर्घः। अतिव्यापिन्यां स्त्रियाम् । "उरूची विश्वे यजते निपातम्" ऋ० ४,५६,४ । "शं न उरूची भवतु स्वधाभिः" ऋ० ७,३५,२ "विश्रयमाणो अमतिमुरूचीम्" ऋ० ७, ४५,२ "या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची" ऋ० ३,५७,५ । स्त्रीभिन्ने उरुच् तदर्थे शसादावचि उरूचः उरूचा इत्यादि ।

**उरूणस्** त्रि० उरु दीर्घे नासिके तस्य नसादेशः वेदे नि०णत्वं दीर्घश्च । दीर्घनासिकायुक्ते "उरूणसावसुतृपा" ऋ० १०,१४,१२ ।

**उरोज** पु० उरसि जायते जन–ड "जे विभाषा" पा० सप्तम्या लुक् । स्त्रीस्तने "दधत्युरोजद्वयमुर्वशीतलम्" 'रेजाते रुचिरदृशामुरोजकुम्भौ" माघः स्तनादिकं सूक्ष्मरूपेण जन्मकाले उत्पन्नमपि यौवने उद्भिद्यते । यथाह भावप्रका०। 'बालानां शुक्रमस्त्येव किन्तु सौक्ष्म्यान्न दृश्यते । तेषां तदेव तारुण्ये पुष्टत्वाद्व्यक्तिमेष्यति । कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा । रोमराज्यादयः पुंसां नारीणामपि यौवने । जायन्ते तत्तयोर्भेदो ज्ञेयो व्याख्यानतः स च"। तथा च पुंसां रोमराजीश्मश्रुप्रभृतयः नारीणां तु रोमराजीस्तनस्तन्यार्त्तवप्रभृतयः" । आर्त्तवस्तनोद्भेदकालश्च एकादशवर्षादुत्तरः स्मृताबुक्तः । "अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी। दशमे कन्यकाप्रोक्ता तत ऊर्द्धं रजस्वला" उ०त० स्मृतिः। इदमपि सम्भावितविषयम् धातुभेदेन तत उत्तरमपि भवतीति लोके दृश्यते सम्भावनाभिया दशमाद्वादर्वाक् देयेति तत्त्वम् । सुश्रुते तु द्वादशवर्षोपरि रजःसम्भव उक्तः । "रसादेव रजः स्त्रीणाम् मासि मासि त्र्यहं स्रवेत् । तद्वर्षाद्द्वादशादूर्द्धं याति पञ्चाशतः क्षयम्" रजःपदं स्तनोद्भेदस्याप्युपलक्षणम् । गर्भिण्याः पीनस्तनत्वे दुग्धबहुलत्वे च कारणमुक्तम् भा०प्र० । "गृहीतगर्भाणां स्त्रीणामार्त्तववहानां स्रोतसां गर्भेणावरोधादार्त्तवं न स्रवति तदेव प्रतिहतमूर्द्ध्व मागतमुपचीयमानमपरा भवति शेषञ्चोर्द्ध्वं तरमागतं पयोधरौ याति तस्मात् गर्भिण्याः पीनोन्नतौ पयोधरौ भवतः" इति । उरोभूप्रभृतयोऽप्यत्र "उरोभुवा कुम्भयुगेन जृम्भितम्" नैष० ।

**उरोभूषण** न० उरोभूष्यतेऽनेन भूष–करणे ल्युट् ६त० । १वक्षोऽलङ्कारे हारे । उरोभूषयति ल्यु । २तदर्थे त्रि० ।

**उरोबृहती** स्त्री वैदिके छन्दोभेदे । "बृहती जागतस्त्रयश्च गायत्राः । पथ्या पूर्वश्चेत्तृतीयः । न्यङ्कुसारिणी द्वितीयः । स्कन्धग्रीवी क्रौष्टुकेः । उरोबृहती यास्कस्य" कात्या० उक्तेः यास्कमते द्वितीयचरणस्य जागतात्मकत्वे अन्येषां त्रयाणां गायत्रात्मकत्वे च सा भवतीत्यर्थः ।

**उरोहस्त** न० उरसि हस्तस्येव प्रेटाघातोयत्र । बाहुयुद्धभेदे बाहुयुद्धप्रकारः भा०स०२२अ० दर्शितः यथा 'करग्रहणपूर्वन्तु कृत्वा पादाभिवादनम् । कक्षैः कक्ष्यां विधुन्वानावास्फोटं तत्र चक्रतुः । स्कन्धे दोर्भ्यां समाहत्य निहत्य च मुहुर्मुहुः। अङ्गमङ्गैः समाश्लिष्य पुनरास्फालनं विभो ! । चित्रहस्तादिकं कृत्वा कक्ष्याबन्धं च चक्रतुः। गलगण्डाभिघातेन सस्फुलिङ्गेन चाशनिम् । बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ । उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ । करसंपीडनं कृत्वा गर्जन्तौ वारणाविव । दुर्दान्तौ मेघसङ्काशौ बाहुप्रहरणावुभौ । तलेनाहन्यमानौ तु अन्योन्यं कृतवीक्षणौ । सिंहाविव सुसंक्रुद्धावाकृष्याकृष्य युध्यतम् । अङ्गेनाङ्गं समापीड्य बाहुभ्यामुभयोरपि । आवृत्य बाहुभिश्चापि उदरं च प्रचक्रतुः । उभौ कट्यां सुपार्श्वे तु तक्षवन्तौ च शिक्षितौ । अधोहस्तं स्वकण्ठे तूदरस्योरसि चाक्षिपत् । सर्वातिक्रान्तमर्यादं पृष्ठभङ्गञ्च चक्रतुः। संपूर्णमूर्च्छा बाहुभ्यां पूर्णकुम्भं प्रचक्रतुः । तृणपीडं यथाकामं पूर्णयोगं समुष्टिकम् । एवमादिनियुद्धानि प्रकुर्वन्तौ परस्परम्" । व्याख्यातञ्चैतत् नीलकण्ठेन "कक्षैः दोर्मूलैः कक्ष्यां प्रकोष्ठगतां रज्जुं धुन्वानौ । यतः तत्र कक्षे आस्फोटं चक्रतुः बाहुमूलास्फालनेन अङ्गदबन्धरज्जुशेषं कम्पयन्तावित्यर्थः । चित्रहस्तादिकं हस्तस्यातिवेगेन आकुञ्चनप्रसारणोपर्यधश्चालनमुष्टीकरणानि चित्रहस्ताः आदिपदात् पादस्याप्याकुञ्चनादि । कक्ष्याबन्धं परस्परकक्षायां हस्तौ कृत्वा बन्धनम् गलेन गण्डेन भालदेशेनाभिघातस्तेन पाषाणसदृशाङ्गत्वात्तयोरभिघातेन विस्फुलिङ्गोत्पत्त्याऽशनिं वज्रमिव सस्जतुरित्यर्थः। बाहुपाशादिकं चरणपाश आदिशब्दार्थः । पादाभ्याम् आहताः